E-ISSN No : 2581-6195 | Volume : 8 | Special Issue | June 2025

# प्राचीनभारते आयुर्वेदस्य उत्पत्तिः

डॉ आभा शर्मा[1], मंजू सुयाल[2]

[1]प्राचार्य, संस्कृत विभाग इन्दिरा प्रियदर्शिनी राजकीय स्नातकोत्तर महिला वाणिज्य महाविद्यालय, हल्द्वानी, नैनीताल, उत्तराखंड

[2] शोध छात्रा, संस्कृत विभाग इन्दिरा प्रियदर्शिनी राजकीय स्नातकोत्तर महिला वाणिज्य महाविद्यालय, हल्द्वानी, नैनीताल, उत्तराखंड

***HOW TO CITE THIS ARTICLE:***

डॉ आभा शर्मा, मंजू सुयाल (2025). प्राचीनभारते आयुर्वेदस्य उत्पत्तिः, International Educational Journal of Science and Engineering (IEJSE), Vol: 8, Special Issue, 133-134

**Research Paper**

आर्याणां वेदाः परमप्राचीनः विज्ञानज्ञानसङ्ग्रहः। अत्रैव प्राचीनपुरुषाणां विद्या विज्ञानानि च संचितानि। आर्येषु तपःबलप्रणिधानालोकोज्ज्वलेषु हृदयेषु प्रतिभप्रकाशरूपेण वर्तमानाव्याहतज्ञानसम्पदा वेदशब्देन व्यवह्रियते। संस्कृतसाहित्ये आर्याणां संस्कृतिसौभर्द्यम् वैदिकाधारेण विराजमानम्। एषु साहित्येषु वेदानां स्थानम् सर्वोपरि वर्तते। भारतीयदर्शनधर्मजीवनञ्च केवलं वेदेषु प्रतिपद्यते। वेदेषु ज्ञानविज्ञानधर्मदर्शनसदाचारसांस्कृतिकसामाजिकराजनैतिकज्योतिषव्याकरणचिकित्साविज्ञानादयः जीवनोपयोगिनः विषयाः सम्यक् संचिताः। एतस्मात् वेदशब्दः ज्ञानार्थकः।


आयुषः स्वरूपं तत्र हिताहितपथ्यापथ्यफलप्रभावे सुखदुःखे, तत्तदवस्थिति–लक्षणैः साधनफलसंपन्नं समन्वितं च आयुर्वेदेन विज्ञाप्यते। चरकेण आयुर्वेदस्यास्य लक्षणं कृतम् –

"हिताहितं सुखं दुःखं च आयुः तस्य हिताहितम्।
मानञ्च तच्च यत्रोक्तमायुर्वेदः स उच्यते।।" 1

सुश्रुताचार्येणापि सुश्रुतसंहितायामायुर्वेदस्य उद्भवः प्रदर्शिता –
आयुरस्मिन् विद्यते, अनेन वायुर्विन्दतीत्यायुर्वेदः। 2

काश्यपसंहितायामपि स्पष्टतयायुर्वेदस्य लक्षणं कथितमस्ति – आयुर्जीवितमुच्यते, विद ज्ञाने धातुः, विदुल् लाभे च, आयुरनेन ज्ञानेन विद्यते ज्ञायते विन्दते लभ्यते न रिष्यतीत्यायुर्वेदः। 3

एतत् प्रथमं स्वयम्भूः ब्रह्मा प्रजानां परिपालनार्थमायुर्वेदमिदमग्रेऽसृजत्। अनन्तरं तस्य विस्तारः एवं अभवत्–




संस्कृत साहित्ये आर्यजनानां सभ्यता संस्कृतिसहित वेदानां ज्योतिरीत्या विराजते। साहित्येऽस्मिन् वेदानां स्थानं सर्वोपरि वर्तते। भारतीयदर्शनस्य धर्मं च जीवनस्य सारं केवलं वेदे लभ्यते। वैदिकवाङ्गस्य महत्त्वं सर्वसामान्येण न व्यक्तव्यं प्रेयशास्त्रम् अपि, श्रेयशास्त्रज्ञेन च, समभावेन समेधितम् । मानवजीवनस्य उद्देश्यानुसार सर्वे विषयाः साधु विवेचिताः सन्ति। तेषु भैषज्यज्ञानरूपमायुर्वेदशास्त्रमपि समुपलभ्यते। लोकानां हिताय विविधेषु ज्ञानविज्ञानप्रभेदेषु उपयोगी यत् विज्ञानरत्नम् अस्ति, तत् आयुर्वेदविज्ञानम् इति कथ्यते। वेदानां उपवेदरूपेण आयुर्वेदशास्त्रं, धनुर्वेदः,गान्धर्वशास्त्रं, स्थापत्यशास्त्रं च विद्वद्भिः उल्लिख्यन्ते। उपवेदेः उपशब्दः एषु सम्बन्धं निर्दिशति। सुश्रुतसंहितायां स्पष्टं वदति दृ

"इह खल्वायुर्वेदमष्टाङ्गमुपाङ्गम् अथर्ववेदस्य"5
चरकाचार्यः अपि वदति –

"चतुर्णाम् ऋक्साम् यजुरथर्ववेदानाम् अथर्ववेदे भक्तिरादेश्या।" 6

एषा वाणी आयुर्वेदस्य चतुर्वेदैः सहास्य सम्बन्धं प्रतिपादयति। काश्यपसंहितायाम् उल्लिखितम् अस्ति – "आयुर्वेदः कथं चोत्पन्नः "इत्यस्य प्रश्नस्य " 7 "अथर्ववेदोपनिषत्सु प्रागुत्पन्नः"8 इत्युक्तः। अतः अस्य शास्त्रस्य आधाररूपेः अथर्ववेदे स्वीकृत्य, उपवेदत्वेन प्रतिष्ठा कृता। यद्यपि सर्वेषु वेदेषु भेषजविषयः न्यूनाधिकभावेन उपलभ्यते, तथापि सम्पूर्ण आयुर्वेदीयविज्ञानस्य सम्बन्धः सर्ववेदसम्बन्धवादेन स्पष्टं प्रतिपादितः। वेदेषु नानाविधानां विज्ञानसामग्रीणां विवेचनं लभ्यते। तेषु आयुर्वेदस्य अपि कतिपया कथाः दृष्टुं शक्यन्ते। तत्र आयुर्वेदविद्यायाः प्राक्तन स्वरूपं स्पष्टरूपेण दृश्यते। अयं वैदिकविज्ञानशाखायाः प्राचीनतमः रूपेण परिगण्यते। अत्यन्तप्राचीनमिदमायुर्ज्ञानमधः सङ्कलीक्रियते।

जराजीर्णः च्यवनऋषि वृद्धः जातः। प्रथम वेदः ऋग्वेदस्य दशममण्डले जराजीर्णस्य च्यवननामकस्य ऋषेः अश्विनीकुमाराभ्यां रसायनप्रदानेन पुनर्योवनप्राप्तेः सम्पूर्णा कथा विस्तरशः वर्ण्यते–

युवं च्यवनमश्विना जरन्तं पुनर्युवानं चक्रथुः शचीभिः।
युवो रथं दुहिता सूर्यस्य सह श्रिया नासत्यावृणीत ।।
(1/113/13)
जुजुरुषो नासत्योत बव्रिं प्रामुञ्चतं द्रापिमिव च्यवानात्।
प्रातिरतं जहितस्यायुर्दस्रादित् पतिमकृणुतं कनीनाम् ।।
(1/116/10)
युवं बन्दन् निॠतं जरण्यया रथं न द्रस्राकरणा समिन्वथः।
क्षेत्रादा बिप्रं जनथो बिपण्यया प्र बामत्र बिधते दंसना भुवत् ।। (1/119/7) इति।

दासैरग्नौ जलेऽपि प्रक्षेपणे रक्षितस्य दीर्घतमसोऽश्विभ्यां दशयुगपर्यन्तं जरामुक्तं पुनर्जीवनवृत्तमित्थम् अस्ति "न मा गरन् नद्यो मातृतमा दासा यदीं सुसमुब्धमवाधुः। शिरो यदङ्ख्य त्रैतनो वितक्षत् स्वयं दासा उरो अंसावपि ग्ध।।" (1/158/5)। इत्यादयः बहवः मन्त्राः ऋग्वेदेषु लभ्यन्ते।

यजुर्वेदः यज्ञयागादिकर्मकाण्डानां मन्त्राणां सन्निवेशोऽस्ति स इति निगद्यते। यजुः' इत्येत्पदं यज्धातोः उसि प्रत्यये कृते निष्पद्यते। यद्यपि यजुर्वेदेः यागविषयका मन्त्रा दृश्यन्ते, तथापि

Copyright© 2025, IEJSE. This open-access article is published under the terms of the Creative Commons Attribution-NonCommercial 4.0 International License which permits Share (copy and redistribute the material in any medium or format) and Adapt (remix, transform, and build upon the material) under the Attribution-NonCommercial terms.

कतिपयः भैजष्यविषयका मन्त्राः अपि आस्यन्ते। शुक्लयजुर्वेदे रोगानाम् निवारणं, औषधिमन्त्रसङ्ग्रहः, अंगानां च गर्भजनन स्वास्थ्यं, जीवनशक्ति पोषणञ्च च वर्ण्यते। अश्विनीकुमारैः च अन्यैः देवैः च माध्यमेन स्वास्थ्यरक्षणं औषधिगुणमहत्त्वं च प्रकटितम् अस्ति–

अविर्न मेषो नसि वीर्याय प्राणस्य पण्था अमृतोग्रहाभ्योम्।
सरस्वत्टुपवकैर्व्यानं नस्यानि बर्हिर्बदरैर्जाजान।।
इनेद्रस्य रुपमृषभो बलाय कर्णाभ्यां श्रोत्रममृतं ग्रहाभ्याम्।
यवा नर्हिर्भुवि केसराणि कर्कन्धु जज्जे मधु सारघं मुघाततत्।।" (12/85/89)
इति।
अश्वमानवयोः शारीराङ्गोल्लेखः यक्ष्मा, पाकार्शी, विषूचि, हृद्रोग, चर्मरोग,
कुष्ठादीनां रोगाणाम् उल्लेखश्च शुक्लयजुर्वेदस्य बहुषु मन्त्रेषु उपलभ्यते।
कृष्णयजुर्वेदे यक्ष्मराजयक्ष्मजयन्यरोगोत्पत्तेश्च विषयो वर्णितोऽस्ति कृष्णयजुर्वेदे
इत्थम्–काम्येष्टिप्रकरणे दृष्टिप्राप्तेर्यक्ष्मोन्मादपरिहारस्य च प्रार्थना।
यक्ष्मराजयक्ष्मजयन्य रोगात्पत्तेः विषयो दृश्यते ।।(2/2/1/1) इति।
एवमेव कृष्णयजुर्वेदस्य बहुषु मन्त्रेषु आयुर्वेदसम्बद्धा मन्त्राः समुपलभ्यन्ते।

ऋङ्गन्ता उदात्तानुदात्तस्वरितैः उच्चार्यते, अपितु साममन्त्रा गीयन्ते। यत्र गीतिरूपा मन्त्रा विद्यन्ते स वेदः 'सामवेदः कथ्यते। सामवेदसंहितायाम् ऋग्वेदे निर्दिष्टानां मन्त्राणां प्रवेशात् तथा आयुर्वेदविषयावबोधकानां मन्त्राणां उपलम्भेन सामवेदे अपि विषयैक्यम् अवगम्यते।

अथर्ववेदसंहितायां बहुविधा आयुर्वेदसम्बद्धा विषयाः प्रकटन्ते। अर्वाचीन वेदः
अथर्ववेदेन आयुर्वेदस्य साकं सम्बन्धः स्फुटीभवति। तत्र बहुषु सूक्तेषु रोगविषयका
मन्त्राः संलक्ष्यन्ते। तेषु उदाहरणं तक्मज्वरस्य वर्णनमित्थमस्ति–
अग्नेरिवास्य दहत एति शुष्मिण उतेव मत्तो विलपल्लपायति।
अन्यमस्मदिच्छतु कं चिदव्रतस्तपूर्वधाय नमो अस्त तक्मने।।
नमो रपद्राय नमो अस्तु तक्मने नमो राज्ञे वरुणाय त्विषीमते।
नमो दिवे नमः पृथिव्यै नम ओषधीभ्यः ।।
अयं यों अभिशोचयिष्णुर्विश्वा रूपाणि हरिता कृणोषि।
तस्मै तेऽरुणाय बभ्रवे नमः कृणोमि वन्याय तक्मने।। (6/21/1–3) इति।

अथर्ववेदे सन्निविष्टं यत् –
या बभ्रवो याश्च शुक्रा रोहिणीरुत पृश्नयः।
असिक्नीः कृष्णा ओषधीः सर्वा अच्छावदामसि ।।
त्रायन्तामिमं पुरुषं यक्ष्माद्देवेषितादधि।
यासां द्यौष्पिता पृथिवी माता समुद्रो मूलं वीरुधां वभुव।।
उत्वाहारषं पञ्चाशलादथो दशशलादुत।
अथो यमस्य पड्वीशाद् विश्वस्माददेवकिल्विषात् ।। (8/7/1–2) इति।

**संदर्भ सूची**


1. च.सं. सुस्था. अ.1
2. सु.सं. सूस्था. अ.1
3. का.सं. वि.स्था. अ.1
4. कल्याण आरोग्य अंक पृ. –173
5. सु.सं. सू.स्था. अ.6
6. च.सं. सू.स्था. अ.30
7. का.सं. वि.स्था. अ.1
8. तदेव।